674/Sans UG/6th Sem/SANS-H-CC-T-13/23

# U.G. 6th Semester Examination - 2023

## SANSKRIT

## [HONOURS]

## Course Code : SANS-H-CC-T-13

Full Marks : 60 Time : $2\frac{1}{2}$ Hours

*The figures in the right-hand margin indicate marks. Candidates are required to give their answers in their own words as far as practicable.*

1. Answer any **ten** questions in Sanskrit Language with Devanāgari Script: 10×2=20

निम्नोक्तेषु **दश** प्रश्नान् सुरगिरा देवनागरीलिप्या च समाधेहि :

क) आस्तिकशब्दस्य का व्युत्पत्ति:? कानि तावद् आस्तिकदर्शनानि?

ख) वस्तुवादस्य विषय: क:? आरम्भवादं के स्वीकुर्वन्ति?

ग) भारतीयदर्शने के तावत् एकात्मवादिन:? के च विवर्तवादिन:?

घ) अद्वैतवादं के स्वीकुर्वन्ति? अद्वैतशब्दस्य कोऽर्थ:?

ङ) देहात्मवादशब्दस्य कोऽर्थ:? भारतीयदर्शने के तावत् देहात्मवादिन:?

च) भारतीयदर्शने सत्कार्यवादं के स्वीकुर्वन्ति?

छ) भारतीयदर्शनशास्त्रे नास्तिकशब्दस्य कोऽर्थ:? एकस्यास्तिकदर्शनस्य नाम लेखनीयं येन ईश्वर: अस्वीकृत:।

[Turn Over]

ज) तर्कसंग्रहदिशा द्रव्यस्य लक्षणं लेखनीयम्। द्रव्यं कतिविधम्?

झ) विशेष: कुत्र वर्तते? कानि तावत् नित्यद्रव्याणि?

ञ) आकाशस्य लक्षणं किम्? शरीरान्त:सञ्चारीयवायु: केन नाम्ना अभिहित: भवति?

ट) अभाव: कतिविध:? प्रागभावस्य स्वरूपं कथनीयम्।

ठ) स्मृते: लक्षणं प्रदेयम्? बुद्धि: कुत्र वर्तते?

ड) कर्म कतिविधम्? कानि च तानि?

ढ) करणस्य लक्षणं किम्? उदाहरणमेकं प्रदेयम्।

ण) के तावत् दार्शनिका: प्रत्यक्षप्रमाणं स्वीकुर्वन्ति? प्रत्यक्षस्य लक्षणं लेखनीयम्।

त) हेत्वाभासशब्दस्य कोऽर्थ:? हेत्वाभास: कतिविध:?

थ) असिद्धहेत्वाभासस्य लक्षणमुदाहरणञ्च प्रदेये।

द) समवायस्य लक्षणमालोच्यताम्।

ध) शब्दप्रमाणस्य स्वरूपं गदनीयम्।

2. Answer any **four** of the following questions: 4×5=20

अधोधृतेषु प्रश्नेषु यथेच्छं **चत्वार:** समाधेया:।

क) भारतीयदर्शनमनुसृत्य देहात्मवादस्य स्वरूपमालोचनीयम्।

ख) तर्कसंग्रहानुसारेण अभाव: कतिविध:? अत्यन्ताभावस्य स्वरूपं सोदाहरणमालोचनीयम्।

ग) व्याप्तेर्लक्षणं प्रतिपाद्य अनुमानप्रक्रियायां व्याप्तेर्तात्पर्यं पर्यालोचनीयम्।

घ) सन्निकर्षशब्दस्य कोऽर्थ:? विशेष्यविशेषणभावसन्निकर्षस्य स्वरूपमालोचनीयम्।



ङ) टीका लेख्या—स्मृति:।

च) व्याख्या कार्या—"अकाङ्क्षा-योग्यता-सन्निधिश्च वाक्यार्थज्ञाने हेतु:।"

छ) हेत्वाभास: निरूपणीय: (कस्यचन **द्वयस्य**)।

i) पर्वतो वह्निमान् प्रमेयत्वात्।

ii) शब्दो नित्य: कृतकत्वात्।

iii) गगनारविन्दं सुरभि अरविन्दत्वात्।

3. Answer any **two** of the following questions. One must be written in Sanskrit Language with Devanagari Script: 2×10=20

अधोलिखितेषु प्रश्नेषु यथेच्छं **प्रश्नद्वयमुत्तरत** तयोरेकमवश्यं संस्कृतेन देवनागरीलिप्या च लेख्यम्।

क) संक्षेपेण सांख्यसम्मत: सत्कार्यवाद: आलोचनीय:।

ख) तर्कसंग्रहानुसारेण कारणस्य लक्षणमुल्लिख्य व्याख्येयम्। करणकारणयो: प्रभेद: प्रदर्शनीय:। किं तावत् व्यापारस्य लक्षणम्।

ग) तर्कसंग्रहानुसारेण सामान्यस्य लक्षणप्रदर्शनपूर्वकं सोदाहरणं पर्यालोचनीयम्।

घ) भारतीयदर्शने विवर्तवादं के दार्शनिका: स्वीकुर्वन्ति? तस्य स्वरूपं सोदाहरणञ्च आलोचनीयम्।